Amritanilayam Stotras

6.1 - ?????????? ???????? - ????? ???????? ????????? ?????? ????

कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां षष्ठकाण्डे प्रथमः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं

ओ -न्नमः परमात्मने , श्री महागणपतये नमः , श्री गुरुभ्यो नमः । ह॒रि॒ः ओम् ॥

प्रा॒चीन॑वग्ंश -ङ्करोति देवमनु॒ष्या दिशो॒ व्य॑भजन्त॒ प्राची ◌᳚ -न्दे॒वा द॑क्षि॒णा पि॒तर॑ः प्र॒तीची ◌᳚ -म्मनु॒ष्या॑ उदी॑चीग्ं रु॒द्रा य - त्प्रा॒चीन॑वग्ंश -ङ्क॒रोति॑ देवलो॒कमे॒व त - द्यज॑मान उ॒पाव॑र्तते॒ परि॑ श्रयत्यु॒न्तर् हि॑तो॒हि दे॑वलो॒को म॑नुष्यलो॒का - न्नास्माल्लो॒का -थ्स्वे॑तव्यमि॒वेत्या॑हुः को हि त -द्वेद॒ य -द्य॒मुष्मि॑ ल्लो॒ँके -ऽस्ति॑ वा॒ न वेति॑ दि॒क्ष्व॑ती का॒शान् क॑रो - [दि॒क्ष्व॑ती का॒शान् क॑रोति , उ॒भयो ◌᳚] 1

-त्यु॒भयो ◌᳚ -र्लो॒कयो॑ -र॒भिजि॑त्यै केशश्म॒श्रु व॑पते न॒खानि॒ नि कृ॑न्तते मृ॒ता वा ए॒षा त्वग॑मे॒द्ध्या य -त्के॑शश्म॒श्रु मृ॒तामे॒व त्वच॑म -मे॒द्ध्याम॑प॒हत्य॑ य॒ज्ञियो॑ भू॒त्वा मेध॒मुपै॒त्यङ्गि॑रस -स्सुव॒र्ग॑ -लो॒ँकं - यँन्तो॒ -ऽफ्सु दी ◌᳚क्षात॒पसी॒ प्रावे॑शयन्न॒फ्सु स्ना॑ति सा॒क्षादे॒व दी ◌᳚क्षात॒पसी॒ अव॑ रुन्धे ती॒र्थे स्ना॑ति ती॒र्थे हि ते ता -म्प्रावे॑शय -न्ती॒र्थे स्ना॑ति [ ] 2

ती॒र्थमे॒व स॑मा॒नाना ◌᳚ -म्भवत्य॒पो ◌᳚ - ऽश्ञात्यन्तर॒त ए॒व मेद्ध्यो॑ भवति॒ वास॑सा दीक्षयति सौ॒म्य॑ -वैँ क्षौम॑ -न्दे॒वत॑या॒ सोम॑मे॒ष दे॒वता॒मुपै॑ति॒ यो दीक्ष॑ते॒ सोम॑स्य त॒नूर॑सि त॒नुव॑ -म्मे पा॒हीत्या॑ह॒ स्वामे॒व

दे॒वता॒मुपै॒त्यथो॑ आ॒शिष॑मे॒वैतामा शा᳚स्ते॒
ऽग्नेस्तू॑षा॒धानं॑ -वाँ॒योर्वा॑त॒पान॑ -
म्पितृ॒णा -न्नी॒वि -रोष॑धीना -म्प्रघा॒त [-
रोष॑धीना -म्प्रघा॒तः , आ॒दि॒त्याना᳚ -
म्प्राचीनता॒नो] 3

आ॑दि॒त्याना᳚ -म्प्राचीनता॒नो विश्वे॑षा -
न्दे॒वाना॒मोतु॒ र्नक्ष॑त्राणा -
मतीका॒शास्तद्वा ए॒त -थ्स॑र्व देव॒त्यं॑ -यँ -
द्वासो॒ य -द्वास॑सा दी॒क्षय॑ति॒
सर्वा॑भिरे॒वैन॑ -न्दे॒वता॑भि -र्दीक्षयति
ब॒हिःप्रा॑णो॒ वै म॑नु॒ष्य॑स्त -स्याश॑न -
म्प्रा॒णो᳚ -ऽश्ञाति॒ सप्रा॑ण ए॒व दी᳚क्षत॒
आशि॑तो भवति॒ यावा॑ने॒वास्य॑ प्रा॒णस्तेन॑ स॒ह
मेध॒मुपै॑ति घृ॒त -न्दे॒वाना॒ -म्मस्तु॑ पितृ॒णा -
न्निष्प॑क्व -म्मनु॒ष्या॑णा॒ -न्तद्वा [-
म्मनु॒ष्या॑णा॒ -न्तद्वै , ए॒त -थ्स॑र्वदेव॒त्यं॑] 4

ए॒त -थ्स॑र्वदेव॒त्यं॑ -यँन्नव॑नीतं॒ -
यँन्नव॑नीतेनाभ्य॒ङ्क्ते सर्वा॑ ए॒व दे॒वताः᳚
प्रीणाति॒ प्रच्यु॑तो॒ वा ए॒षो᳚ -
ऽस्माल्लो॒कादग॑तो देवलो॒कं -योँ दी᳚क्षि॒तो᳚
ऽन्त॒रेव॒ नव॑नीत॒ -न्तस्मा॒ -
न्नव॑नीतेना॒भ्य॑ङ्क्ते ऽनुलो॒मं -यँजु॑षा॒
व्यावृ॑त्त्या॒ इन्द्रो॑ वृ॒त्रम॑ह॒ -न्तस्य॑
क॒नीनि॑का॒ परा॑ -ऽपत॒ -त्तदाञ्ज॑नम -
भव॒द्यदा॒ङ्क्ते चक्षु॑रे॒व भ्रातृ॑व्यस्य
वृङ्क्ते॒ दक्षि॑ण॒ -म्पूर्व॒मा -ऽङ्क्ते॑ [
दक्षि॑ण॒ -म्पूर्व॒मा -ऽङ्क्ते᳚ , स॒व्यग्ं हि] 5

स॒व्यग्ं हि पूर्व॑ -म्मनु॒ष्या॑ आ॒ञ्जते॒ न नि
धा॑वते॒ नीव॒ हि म॑नु॒ष्या॑ धाव॑न्ते॒ पञ्च॒
कृत्व॒ आ -ऽङ्क्ते॒ पञ्चा᳚क्षरा प॒ङ्क्तिः
पाङ्क्तो॑ य॒ज्ञो य॒ज्ञमे॒वाव॑ रुन्धे॒
परि॑मित॒माङ्क्ते ऽप॑रिमित॒ग्ं॒ हि म॑नु॒ष्या॑
आ॒ञ्जते॒ सतू॑ल॒या -ऽऽङ्क्ते - ऽप॑तूलया॒ हि
म॑नु॒ष्या॑ आ॒ञ्जते॒ व्यावृ॑त्त्यै॒
यदप॑तूलयाञ्जी॒त वज्र॑ इव स्या॒ -थ्सतू॑ल॒या -
ऽऽङ्क्ते॑ मित्र॒त्वाये - [मित्र॒त्वाय॑ ,
इन्द्रो॑] 6

-न्द्रो॑ वृ॒त्रम॑ह॒न् थ्सो᳚ -ऽ (1॒)पो᳚ -ऽ (1॒)भ्य॑ -
म्रियत॒ तासां॒ -यँन्मेद्ध्यं॑ -यँ॒ज्ञिय॒ग्ं॒
सदे॑व॒मासी॒ -त्तद॒पोद॑क्राम॒ -त्ते द॒र्भा
अ॑भव॒न्॒ . यद्द॑र्भपुञ्जी॒लैः प॒वय॑ति॒ या ए॒व
मेद्ध्या॑ य॒ज्ञिया॒ -स्सदे॑वा॒
आप॒स्ताभि॑रे॒वैन॑ -म्पवयति॒ द्वाभ्या᳚ -
म्पवयत्य -होरा॒त्राभ्या॑मे॒वैन॑ -म्पवयति
त्रि॒भिः प॑वयति॒ त्रय॑ इ॒मे लो॒का ए॒भिरे॒वैनं॑
-लोँ॒कैः प॑वयति प॒ञ्चभिः॑ [प॒ञ्चभिः॑ , प॒व॒य॒ति॒
पञ्चा᳚क्षरा] 7

पवयति॒ पञ्चा᳚क्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो
य॒ज्ञायै॒वैन॑ -म्पवयति ष॒ड्भिः प॑वयति॒ षड्वा
ऋ॒तव॑ ऋ॒तुभि॑रे॒वैन॑ -म्पवयति स॒प्तभिः॑ पवयति
स॒प्त छन्दाग्ं॑सि॒ छन्दो॑भिरे॒वैन॑ -म्पवयति
न॒वभिः॑ पवयति॒ नव॒ वै पुरु॑षे प्रा॒णा -
स्सप्रा॑णमे॒वैन॑ -म्पवय॒त्येक॑विग्ंशत्या
पवयति॒ दश॒ हस्त्या॑ अ॒ङ्गुल॑यो॒ दश॒ पद्या॑
आ॒त्मैक॑वि॒ग्ं॒शो यावा॑ने॒व पुरु॑ष॒स्त -
मप॑रिवर्ग - [पुरु॑ष॒स्त -मप॑रिवर्गम् , प॒व॒य॒ति॒
चि॒त्पति॑स्त्वा] 8

-म्पवयति चि॒त्पति॑स्त्वा पुना॒त्वित्या॑ह॒
मनो॒ वै चि॒त्पति॒र्मन॑सै॒वैन॑ -म्पवयति
वा॒क्पति॑स्त्वा पुना॒त्वित्या॑ह वा॒चैवैन॑ -
म्पवयति दे॒वस्त्वा॑ सवि॒ता पु॑ना॒त्वित्या॑ह
सवि॒तृप्र॑सूत ए॒वैन॑ -म्पवयति॒ तस्य॑ ते
पवित्रपते प॒वित्रे॑ण॒ यस्मै॒ क -म्पु॒ने
तच्छ॑केय॒मित्या॑ -हा॒ -ऽऽशिष॑मे॒वैतामा शा᳚स्ते
॥ 9 ॥
(अ॒ती॒का॒शान् क॑रो॒त्य – वे॑शय -न्ति॒र्थ
स्ना॑ति – प्रघा॒तो – म॑नु॒ष्या॑णा॒ -न्तद्वा –
आ -ऽङ्क्ते॑ – मित्र॒त्वाय॑ – प॒ञ्चभि॒ –
रप॑रिवर्ग – म॒ष्टाच॑त्वारिग्ंशच्च) (अ. 1)

याव॑न्तो॒ वै दे॒वा य॒ज्ञायापु॑नत॒ त
ए॒वाभ॑व॒न्॒ . य ए॒वं -विँ॒द्वान् . य॒ज्ञाय॑
पुनी॒ते भव॑त्ये॒व ब॒हिः प॑वयि॒त्वा -ऽन्तः प्र
पा॑दयति मनुष्यलो॒क ए॒वैन॑ -म्पवयि॒त्वा पू॒त -
न्दे॑वलो॒क -म्प्र ण॑य॒त्यदी᳚क्षित॒ एक॒या -
ऽऽहु॒त्येत्या॑हु -स्स्रु॒वेण॒ चत॑स्रो जुहोति

दीक्षित॒त्वाय॑ स्रु॒चा प॑ञ्च॒मी -
म्पञ्चा᳚क्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो
य॒ज्ञमे॒वाव॑ रुन्ध॒ आकू᳚त्यै प्र॒युजे॒ -
ऽग्नये॒ [प्र॒युजे॒ -ऽग्नये᳚ , स्वाहेत्या॒हा] 10

स्वाहेत्या॒हा -ऽऽकू᳚त्या॒ हि पुरु॑षो य॒ज्ञम॒भि
प्र॑यु॒ङ्क्ते यजे॒येति॑ मे॒धायै॒ मन॑से॒ -
ऽग्नये॒ स्वाहेत्या॑ह मे॒धया॒ हि मन॑सा॒ पुरु॑षो
य॒ज्ञम॑भि॒गच्छ॑ति॒ सर॑स्वत्यै पू॒ष्णे᳚ -
ऽग्नये॒ स्वाहेत्या॑ह॒ वाग्वै सर॑स्वती पृथि॒वी
पू॒षा वा॒चैव पृ॑थि॒व्या य॒ज्ञ -म्प्रयु॑ङ्क्त॒
आपो॑ देवी -र्बृहती -र्विश्वशम्भुव॒ इत्या॑ह॒ या
वै वर् ष्या॒स्ता [या वै वर् ष्या॒स्ताः , आपो॑ दे॒वी
-र्बृ॑ह॒ती -] 11

आपो॑ दे॒वी -र्बृ॑ह॒ती -र्वि॒श्वश॑भुं वोँ॒ यदे॒त -
द्यजु॒र्न ब्रू॒या -द्दि॒व्या आपो -ऽशा᳚न्ता इ॒मं -
लोँ॒कमा ग॑च्छेयु॒रापो॑ देवी -र्बृहती -
र्विश्वशम्भुव॒ इत्या॑हा॒स्मा ए॒वैना॑ लो॒काय॑
शमयति॒ तस्मा᳚च्छा॒न्ता इ॒मं -लोँ॒कमा
ग॑च्छन्ति॒ द्यावा॑पृथि॒वी इत्या॑ह॒
द्यावा॑पृथि॒व्योर् हि य॒ज्ञ उ॒र्व॑न्तरि॑क्ष॒ -
मित्या॑हा॒न्तरि॑क्षे॒ हि य॒ज्ञो
बृह॒स्पति॑र्नो ह॒विषा॑ वृधा॒ - [ह॒विषा॑ वृधातु ,
इत्या॑ह॒ ब्रह्म॒ वै] 12

-त्वित्या॑ह॒ ब्रह्म॒ वै दे॒वाना॒ -म्बृह॒स्पति॒ -
र्ब्रह्म॑णै॒वास्मै॑ य॒ज्ञमव॑ रुन्धे॒ यद् -
ब्रू॒या -द्वि॑धे॒रिति॑ यज्ञस्था॒णुमृ॑च्छे -
द्वृधा॒त्वित्या॑ह यज्ञस्था॒णुमे॒व परि॑
वृणक्ति प्र॒जाप॑ति -र्य॒ज्ञम॑सृजत॒ सो᳚ -ऽस्मा -
थ्सृ॒ष्टः परां॑ऐ॒ -थ्स प्र यजु॒रव्ली॑ना॒ -त्प्र
साम॒ तमृगुद॑यच्छ॒ -द्यदृगु॒दय॑च्छ॒ -त्तदौ᳚ -
द्ग्रह॒णस्यौ᳚ -द्ग्रहण॒त्व मृ॒चा [मृ॒चा ,
जु॒हो॒ति॒ य॒ज्ञस्योद्य॑त्या] 13

जु॑होति य॒ज्ञस्योद्य॑त्या अनु॒ष्टुप् -
छन्द॑सा॒ -मुद॑यच्छ॒दित्या॑ -
हु॒स्तस्मा॑दनु॒ष्टुभा॑ जुहोति
य॒ज्ञस्योद्य॑त्यै॒ द्वाद॑श
वाथ्सब॒न्धान्युद॑यच्छ॒ -न्नित्या॑हु॒ -

स्तस्मा᳚द् - द्वाद॒शभि॑ -र्वाथ्सबन्ध॒विदो॑
दीक्षयन्ति॒ सा वा ए॒षर्ग॑नु॒ष्टुग् -
वाग॑नु॒ष्टुग् -यदे॒तय॒र्चा दी॒क्षय॑ति
वा॒चैवैन॒ग्ं॒ सर्व॑या दीक्षयति॒ विश्वे॑
दे॒वस्य॑ ने॒तुरित्या॑ह सावि॒त्र्ये॑तेन॒
मर्तो॑ वृणीत स॒ख्य - [स॒ख्यम् , इत्या॑ह] 14

-मित्या॑ह पितृदेव॒त्यै॑तेन॒ विश्वे॑ रा॒य
इ॑षुद्ध्य॒सीत्या॑ह वैश्वदे॒व्ये॑तेन॑
द्यु॒म्नं -वृँ॑णीत पु॒ष्यस॒ इत्या॑ह
पौ॒ष्ण्ये॑तेन॒ सा वा ए॒षर्ख्स॑र्वदेव॒त्या॑
यदे॒तय॒र्चा दी॒क्षय॑ति॒ सर्वा॑भिरे॒वैन॑ -
न्दे॒वता॑भिर्दीक्षयति स॒प्ताक्ष॑र -म्प्रथ॒म -
म्प॒दम॒ष्टाक्ष॑राणि॒ त्रीणि॒ यानि॒ त्रीणि॒
तान्य॒ष्टावुप॑ यन्ति॒ यानि॑ च॒त्वारि॒
तान्य॒ष्टौ यद॒ष्टाक्ष॑रा॒ तेन॑ [तेन॑,
गा॒य॒त्री यदेका॑दशाक्षरा॒] 15

गाय॒त्री यदेका॑दशाक्षरा॒ तेन॑ त्रि॒ष्टुग्य -
द्द्वाद॑शाक्षरा॒ तेन॒ जग॑ती॒ सा वा
ए॒षर्ख्सर्वा॑णि॒ छन्दाग्ं॑सि॒ यदे॒तय॒र्चा
दी॒क्षय॑ति॒ सर्वे॑भिरे॒वैन॒ -
ञ्छन्दो॑भिर्दीक्षयति स॒प्ताक्ष॑र -म्प्रथ॒म -
म्प॒दग्ं स॒प्तप॑दा॒ शक्व॑री प॒शव॒ -श्शक्व॑री
प॒शूने॒वाव॑ रुन्ध॒ एक॑स्माद॒क्षरा॒दना᳚प्त -
म्प्रथ॒म -म्प॒द -न्तस्मा॒ -द्य -द्वा॒चो -ऽना᳚प्त॒ -
न्तन्म॑नु॒ष्या॑ उप॑ जीवन्ति पू॒र्णया॑ जुहोति
पू॒र्ण इ॑व॒ हि प्र॒जाप॑तिः
प्र॒जाप॑ते॒राप्त्यै॒ न्यू॑नया जुहोति॒
न्यू॑ना॒द्धि प्र॒जाप॑तिः प्र॒जा असृ॑जत
प्र॒जाना॒ग्ं॒ सृष्ट्यै᳚ ॥ 16 ॥
(अ॒ग्नये॒ – ता – वृ॑धात्वृ॒ – चा – स॒ख्यं – तेन॑ –
जुहोति॒ – पञ्च॑दश च) (अ. 2)

ऋ॒ -ख्सा॒मे वै दे॒वेभ्यो॑ य॒ज्ञाया -ऽति॑ष्ठमाने॒
कृष्णो॑ रू॒प -ङ्कृ॒त्वा - ऽप॒क्रम्या॑तिष्ठता॒ -
न्ते॑ -ऽमन्यन्त॒ यं -वाँ इ॒मे उ॑पाव॒र्थ्स्यत॒ -
स्स इ॒द -म्भ॑विष्य॒तीति॒ ते उपा॑मन्त्रयन्त॒ ते
अ॑होरा॒त्रयो᳚ -र्महि॒मान॑ -मपनि॒धाय॑
दे॒वानु॒पाव॑र्तेतामे॒ष वा ऋ॒चो वर्णो॒
यच्छु॒क्ल -ङ्कृ॑ष्णाजि॒नस्यै॒ष साम्नो॒ य -

त्कृ॒ष्णमृ॑ख्सा॒मयो॒ -श्शिल्पे᳚ स्थ॒
इत्या॑हर्ख्सा॒मे ए॒वा -ऽव॑ रुन्ध ए॒ष [ए॒वा -ऽव॑
रुन्ध ए॒षः, वा अह्नो॒] 17

वा अह्नो॒ वर्णो॒ यच्छु॒क्ल -
ङ्कृ॑ष्णाजि॒नस्यै॒ष रात्रि॑या॒ य -त्कृ॒ष्णं -
यँदे॒वैन॑यो॒स्तत्र॒ न्य॑क्त॒ -न्तदे॒वाव॑
रुन्धे कृष्णाजि॒नेन॑ दीक्षयति॒ ब्रह्म॑णो॒ वा
ए॒त -द्रू॒पं -यँ -त्कृ॑ष्णाजि॒न -म्ब्रह्म॑णै॒वैन॑ -
न्दीक्षयती॒मा -न्धिय॒ग्ं॒ शिक्ष॑माणस्य
दे॒वेत्या॑ह यथाय॒जुरे॒वैत -द्गर्भो॒ वा ए॒ष य -
द्दी᳚क्षि॒त उल्बं॒ -वाँसः॒ प्रोर्णु॑ते॒ तस्मा॒ -
[तस्मा᳚त् , गर्भाः॒ प्रावृ॑ता] 18

-द्गर्भाः॒ प्रावृ॑ता जायन्ते॒ न पु॒रा सोम॑स्य
क्र॒यादपो᳚र्ण्वीत॒ य -त्पु॒रा सोम॑स्य
क्र॒याद॑पोर्ण्वी॒त गर्भाः᳚ प्र॒जाना᳚ -
म्परा॒पातु॑का -स्स्युः क्री॒ते सोमे -
ऽपो᳚र्णुते॒ जाय॑त ए॒व तदथो॒ यथा॒ वसी॑याग्ं स -
म्प्रत्यपोर्णु॒ते ता॒दृगे॒व तदङ्गि॑रस -
स्सुव॒र्गं -लोँ॒कं -यँन्त॒ ऊर्जं॒ -व्यँ॑भजन्त॒
ततो॒ यद॒त्यशि॑ष्यत॒ ते श॒रा अ॑भव॒न्नूर्ग्वै
श॒रा यच्छ॑र॒मयी॒ [यच्छ॑र॒मयी᳚ , मेख॑ला॒] 19

मेख॑ला॒ भव॒त्यूर्ज॑मे॒वाव॑ रुन्धे मद्ध्य॒त -
स्सन्न॑ह्यति मद्ध्य॒त ए॒वास्मा॒ ऊर्ज॑ -
न्दधाति॒ तस्मा᳚न्मद्ध्य॒त ऊ॒र्जा भु॑ञ्जत
ऊ॒र्ध्वं -वैँ पुरु॑षस्य॒ नाभ्यै॒ मेद्ध्य॑ -
मवा॒चीन॑ -ममे॒द्ध्यं -यँन्म॑द्ध्य॒त -
स्स॒नंह्य॑ति॒ मेद्ध्य॑ -ञ्चै॒वास्या॑मे॒द्ध्य -
ञ्च॒ व्याव॑र्तय॒तीन्द्रो॑ वृ॒त्राय॒ वज्र॒ -
म्प्राह॑र॒ -थ्स त्रे॒धा व्य॑भव॒ -
थ्स्फ्यस्तृती॑य॒ग्ं॒ रथ॒स्तृती॑यं॒ -
यूँप॒स्तृती॑यं॒ - [-यूप॒स्तृती॑य॒म् , ये᳚ -ऽन्त -
श्श॒रा] 20

-येँ᳚ -ऽन्त -श्श॒रा अशी᳚र्यन्त॒ ते श॒रा अ॑भव॒ -
न्तच्छ॒राणाग्ं॑ शर॒त्वं -वँज्रो॒ वै श॒राः , क्षु -
त्खलु॒ वै म॑नु॒ष्य॑स्य॒ भ्रातृ॑व्यो॒
यच्छ॑र॒मयी॒ मेख॑ला॒ भव॑ति॒ वज्रे॑णै॒व सा॒क्षा -
त्क्षुध॒ -म्भ्रातृ॑व्य -म्मद्ध्य॒तो -ऽप॑ हते

त्रि॒वृ -द्भ॑वति त्रि॒वृद्वै
प्रा॒णस्त्रि॒वृत॑मे॒व प्रा॒ण -म्म॑द्ध्य॒तो
यज॑माने दधाति पृ॒थ्वी भ॑वति॒ रज्जू॑नां॒ -
व्याँवृ॑त्यै॒ मेख॑लया॒ यज॑मान -न्दीक्षयति॒
योक्त्रे॑ण॒ पत्नी᳚ -म्मिथुन॒त्वाय॑ [ ] 21

य॒ज्ञो दक्षि॑णाम॒भ्य॑द्ध्याय॒ -त्ताग्ं सम॑भव॒ -
त्तदिन्द्रो॑ -ऽचाय॒ -थ्सो॑ -ऽमन्यत॒ यो वा इ॒तो
ज॑नि॒ष्यते॒ स इ॒द -म्भ॑विष्य॒तीति॒ ता -
म्प्रावि॑श॒ -त्तस्या॒ इन्द्र॑ ए॒वाजा॑यत॒ सो॑ -
ऽमन्यत॒ यो वै मदि॒तो ऽप॑रो जनि॒ष्यते॒ स इ॒द -
म्भ॑विष्य॒तीति॒ तस्या॑ अनु॒मृश्य॒ योनि॒मा -
ऽच्छि॑न॒ -थ्सा सू॒तव॑शा -ऽभव॒ -त्त -थ्सू॒तव॑शायै॒
जन्म॒ [जन्म॑ , ताग्ं हस्ते॒ न्य॑वेष्टयत॒] 22

ताग्ं हस्ते॒ न्य॑वेष्टयत॒ ता -म्मृ॒गेषु॒
न्य॑दधा॒ -थ्सा कृ॑ष्णविषा॒णा -
ऽभ॑व॒दिन्द्र॑स्य॒ योनि॑रसि॒ मा मा॑
हिग्ंसी॒रिति॑ कृष्णविषा॒णा -म्प्र य॑च्छति॒
सयो॑निमे॒व य॒ज्ञ -ङ्क॑रोति॒ सयो॑नि॒ -
न्दक्षि॑णा॒ग्ं॒ सयो॑नि॒मिन्द्रग्ं॑
सयोनि॒त्वाय॑ कृ॒ष्यै त्वा॑ सुस॒स्याया॒
इत्या॑ह॒ तस्मा॑दकृष्टप॒च्या ओष॑धयः पच्यन्ते
सुपिप्प॒लाभ्य॒ -स्त्वौष॑धीभ्य॒ इत्या॑ह॒
तस्मा॒दोष॑धयः॒ फल॑ -ङ्गृह्णन्ति॒ यद्धस्ते॑न [
यद्धस्ते॑न , क॒ण्डू॒येत॑] 23

कण्डू॒येत॑ पामन॒ -म्भावु॑काः प्र॒जा -स्स्यु॒र्य -
थ्स्मये॑त नग्न॒ -म्भावु॑काः कृष्णविषा॒णया॑
कण्डूयते -ऽपि॒गृह्य॑ स्मयते प्र॒जाना᳚ -
ङ्गोपी॒थाय॒ न पु॒रा दक्षि॑णाभ्यो॒ नेतोः᳚
कृष्णविषा॒णामव॑ चृते॒द्य -त्पु॒रा
दक्षि॑णाभ्यो॒ नेतोः᳚ कृष्णविषा॒णा -म॑वचृ॒ते -
द्योनिः॑ प्र॒जाना᳚ -म्परा॒पातु॑का
स्यान्नी॒तासु॒ दक्षि॑णासु॒ चात्वा॑ले
कृष्णविषा॒णा -म्प्रास्य॑ति॒ योनि॒र्वै
य॒ज्ञस्य॒ चात्वा॑लं॒ -योँनिः॑ कृष्णविषा॒णा
योना॑वे॒व योनि॑ -न्दधाति य॒ज्ञस्य॑
सयोनि॒त्वाय॑ ॥ 24 ॥
(रु॒न्ध॒ ए॒ष – तस्मा᳚ – च्छर॒मयी॒ –
यूप॒स्तृती॑यं – मिथुन॒त्वाय॒ – जन्म॒ –

हस्ते॑ना॒ – ऽष्टाच॑त्वारिग्ंशच्च) (अ. 3)

वाग्वै दे॒वेभ्यो ऽपा᳚क्राम -
द्य॒ज्ञायाति॑ष्ठमाना॒ सा वन॒स्पती॒ -
न्प्रावि॑श॒ -थ्सैषा वाग्वन॒स्पति॑षु वदति॒ या
दु॑न्दु॒भौ या तूण॑वे॒ या वीणा॑यां॒ -यँ -
द्दी᳚क्षितद॒ण्ड -म्प्र॒यच्छ॑ति॒ वाच॑मे॒वाव॑
रुन्ध॒ औदु॑बंरो भव॒त्यूर्ग्वा उ॑दु॒बंर॒
ऊर्ज॑मे॒वाव॑ रुन्धे॒ मुखे॑न॒ सम्मि॑तो भवति
मुख॒त ए॒वास्मा॒ ऊर्ज॑ -न्दधाति॒ तस्मा᳚ -न्मुख॒त
ऊ॒र्जा भु॑ञ्जते [ ] 25

क्री॒ते सोमे॑ मैत्रावरु॒णाय॑ द॒ण्ड -म्प्र
य॑च्छति मैत्रावरु॒णो हि पु॒रस्ता॑ -
दृ॒त्विग्भ्यो॒ वाचं॑ -विँ॒भज॑ति॒ तामृ॒त्विजो॒
यज॑माने॒ प्रति॑ ष्ठापयन्ति॒ स्वाहा॑ य॒ज्ञ -
म्मन॒सेत्या॑ह॒ मन॑सा॒ हि पुरु॑षो
य॒ज्ञम॑भि॒गच्छ॑ति॒ स्वाहा॒
द्यावा॑पृथि॒वीभ्या॒ -मित्या॑ह॒
द्यावा॑पृथि॒व्योर् हि य॒ज्ञ -स्स्वाहो॒रोर॒ -
न्तरि॑क्षा॒ -दित्या॑हा॒न्तरि॑क्षे॒ हि य॒ज्ञ -
स्स्वाहा॑ य॒ज्ञं -वाँता॒दा र॑भ॒ इत्या॑हा॒ -ऽयं - [
इत्या॑हा॒ -ऽयम्, वाव यः पव॑ते॒] 26

-वाँव यः पव॑ते॒ स य॒ज्ञस्तमे॒व सा॒क्षादा र॑भते
मु॒ष्टी क॑रोति॒ वाचं॑ -यँच्छति य॒ज्ञस्य॒
धृत्या॒ अदी᳚क्षिष्टा॒य -म्ब्रा᳚ह्म॒ण इति॒
त्रिरु॑पा॒ग्॒श्वा॑ह दे॒वेभ्य॑ ए॒वैन॒ -म्प्रा -
ऽऽह॒ त्रिरु॒च्चैरु॒भये᳚भ्य ए॒वैन॑ -
न्देवमनु॒ष्येभ्यः॒ प्रा -ऽऽह॒ न पु॒रा
नक्ष॑त्रेभ्यो॒ वाचं॒ -विँ सृ॑जे॒ -द्यत्पु॒रा
नक्ष॑त्रेभ्यो॒ वाचं॑ -विँसृ॒जे -द्य॒ज्ञं -
विँच्छि॑न्द्या॒ - [-विँच्छि॑न्द्यात् , उदि॑तेषु॒]
27

-दुदि॑तेषु॒ नक्ष॑त्रेषु व्र॒त -ङ्कृ॑णु॒तेति॒
वाचं॒ -विँ सृ॑जति य॒ज्ञव्र॑तो॒ वै दी᳚क्षि॒तो
य॒ज्ञमे॒वाभि वाचं॒ -विँ सृ॑जति॒ यदि॑ विसृ॒जे -
द्वै᳚ष्ण॒वीमृच॒मनु॑ ब्रूया -द्य॒ज्ञो वै
विष्णु॑र्य॒ज्ञेनै॒व य॒ज्ञग्ं स -न्त॑नोति॒
दैवी॒ -न्धिय॑ -म्मनामह॒ इत्या॑ह य॒ज्ञमे॒व

तन्म्र॑दयति सुपा॒रा नो॑ अस॒द्वश॒ इत्या॑ह॒
व्यु॑ष्टिमे॒वाव॑ रुन्धे [रुन्धे ,
ब्र॒ह्म॒वा॒दिनो॑ वदन्ति] 28

ब्रह्मवा॒दिनो॑ वदन्ति होत॒व्य॑ -
न्दीक्षि॒तस्य॑ गृ॒हा (3) इ न हो॑त॒व्या (3)मिति॑
ह॒विर्वै दी᳚क्षि॒तो यज्जु॑हु॒या -
द्यज॑मानस्याव॒दाय॑ जुहुया॒ -द्यन्न जु॑हु॒या -
द्य॑ज्ञप॒रुर॒न्तरि॑या॒द्ये दे॒वा मनो॑जाता
मनो॒युज॒ इत्या॑ह प्रा॒णा वै दे॒वा मनो॑जाता
मनो॒युज॒स्तेष्वे॒व प॒रोक्ष॑ -ञ्जुहोति॒
तन्नेव॑ हु॒त -न्नेवाहु॑तग्ग् स्व॒पन्तं॒ -वैँ
दी᳚क्षि॒तग्ं रक्षाग्ं॑सि जिघाग्ंसन्त्य॒ग्निः
– [जिघाग्ंसन्त्य॒ग्निः , खलु॒ वै] 29

खलु॒ वै र॑क्षो॒हा -ऽग्ने॒ त्वग्ं सु जा॑गृहि
व॒यग्ं सु म॑न्दिषीम॒हीत्या॑हा॒ग्नि -
मे॒वाधि॒पा -ङ्कृ॒त्वा स्व॑पिति॒
रक्ष॑सा॒मप॑हत्या अव्र॒त्यमि॑व॒ वा ए॒ष क॑रोति॒
यो दी᳚क्षि॒त -स्स्वपि॑ति॒ त्वम॑ग्ने व्रत॒पा
अ॒सीत्या॑हा॒ग्निर्वै दे॒वानां᳚ -व्रँ॒तप॑ति॒ -
स्स ए॒वैनं॑ -व्रँ॒तमा ल॑भं यँति दे॒व आ
मर्त्ये॒ष्वेत्या॑ह दे॒वो [दे॒वः , ह्ये॑ष स -
न्मर्त्ये॑षु॒] 30

ह्ये॑ष स -न्मर्त्ये॑षु॒ त्वं -यँ॒ज्ञेष्वीड्य॒
इत्या॑है॒तग्ं हि य॒ज्ञेष्वीड॒ते -ऽप॒ वै
दी᳚क्षि॒ता -थ्सु॑षु॒पुष॑ इन्द्रि॒य -न्दे॒वताः᳚
क्रामन्ति॒ विश्वे॑ दे॒वा अ॒भि मामा -ऽव॑वृत्र॒ -
न्नित्या॑ -हेन्द्रि॒येणै॒वैन॑ -न्दे॒वता॑भि॒ -
स्स -न्न॑यति॒ यदे॒त -द्यजु॒र्न ब्रू॒या -द्याव॑त
ए॒व प॒शून॒भि दीक्षे॑त॒ ताव॑न्तो -ऽस्य प॒शवः॑
स्यू॒ रास्वेय॑ - [प॒शवः॑ स्यू॒ रास्वेय॑त् , सो॒मा -
ऽऽ भूयो॑] 31

-थ्सो॒मा -ऽऽ भूयो॑ भ॒रेत्या॒हा -प॑रिमिताने॒व
प॒शूनव॑ रुन्धे च॒न्द्रम॑सि॒ मम॒ भोगा॑य
भ॒वेत्या॑ह यथादेव॒तमे॒वैनाः॒ प्रति॑ गृह्णाति
वा॒यवे᳚ त्वा॒ वरु॑णाय॒ त्वेति॒ यदे॒वमे॒ता
नानु॑दि॒शेदय॑थादेवत॒ -न्दक्षि॑णा गमये॒दा
दे॒वता᳚भ्यो वृश्च्येत॒ यदे॒वमे॒ता

अ॑नुदि॒शति॑ यथादेव॒तमे॒व दक्षि॑णा गमयति॒ न
दे॒वता᳚भ्य॒ आ [न दे॒वता᳚भ्य॒ आ, वृ॒श्च्य॒ते॒
देवी॑रापो] 32

वृ॑श्च्यते॒ देवी॑रापो अपा -न्नपा॒दित्या॑ह॒
यद्वो॒ मेद्ध्यं॑ -यँ॒ज्ञिय॒ग्ं॒ सदे॑व॒ -
न्तद्वो॒ मा -ऽव॑ क्रमिष॒मिति॒
वावैतदा॒हाच्छि॑न्न॒ -न्तन्तु॑ -म्पृथि॒व्या
अनु॑ गेष॒मित्या॑ह॒ सेतु॑मे॒व कृ॒त्वा -ऽत्ये॑ति
॥ 33 ॥
(भु॒ञ्ज॒ते॒ – ऽयं – छि॑न्द्या -द् - रुन्धे॒ –
ऽग्नि – रा॑ह दे॒व – इय॑ -द् - दे॒वता᳚भ्य॒ आ –
त्रय॑स्त्रिग्ंशच्च) (अ. 4)

दे॒वा वै दे॑व॒यज॑न -मद्ध्यव॒साय॒ दिशो॒ न
प्राजा॑न॒ -न्ते᳚ (1॒)-ऽन्यो᳚ -ऽन्यमुपा॑धाव॒ -
न्त्वया॒ प्र जा॑नाम॒ त्वयेति॒ ते -ऽदि॑त्या॒ग्ं॒
सम॑द्ध्रयन्त॒ त्वया॒ प्र जा॑ना॒मेति॒ सा -
ऽब्र॑वी॒ -द्वरं॑ -वृँणै॒ मत्प्रा॑यणा ए॒व वो॑
य॒ज्ञा मदु॑दयना अस॒न्निति॒ तस्मा॑दादि॒त्यः
प्रा॑य॒णीयो॑ य॒ज्ञाना॑मादि॒त्य उ॑दय॒नीयः॒
पञ्च॑ दे॒वता॑ यजति॒ पञ्च॒ दिशो॑ दि॒शा -
म्प्रज्ञा᳚त्या॒ [दि॒शा -म्प्रज्ञा᳚त्यै , अथो॒
पञ्चा᳚क्षरा] 34

अथो॒ पञ्चा᳚क्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो
य॒ज्ञमे॒वाव॑ रुन्धे॒ पथ्याग्॑ स्व॒स्तिम॑यज॒ -
न्प्राची॑मे॒व तया॒ दिश॒ -
म्प्राजा॑नन्न॒ग्निना॑ दक्षि॒णा सोमे॑न
प्र॒तीचीग्ं॑ सवि॒त्रोदी॑ची॒ -मदि॑त्यो॒र्ध्वा -
म्पथ्याग्॑ स्व॒स्तिं यँ॑जति॒ प्राची॑मे॒व तया॒
दिश॒ -म्प्र जा॑नाति॒ पथ्याग्॑
स्व॒स्तिमि॒ष्ट्वा -ऽग्नीषोमौ॑ यजति॒ चक्षु॑षी॒
वा ए॒ते य॒ज्ञस्य॒ यद॒ग्नीषोमौ॒
ताभ्या॑मे॒वानु॑ पश्य - [पश्यति , अ॒ग्नीषोमा॑ -
वि॒ष्ट्वा] 35

-त्य॒ग्नीषोमा॑ -वि॒ष्ट्वा स॑वि॒तारं॑ -यँजति
सवि॒तृप्र॑सूत ए॒वानु॑ पश्यति
सवि॒तार॑मि॒ष्ट्वा -ऽदि॑तिं -यँजती॒यं -वाँ
अदि॑तिर॒स्यामे॒व प्र॑ति॒ष्ठायानु॑

पश्य॒त्यदि॑तिमि॒ष्ट्वा मा॑रु॒तीमृच॒मन्वा॑ह
म॒रुतो॒ वै दे॒वानां॒ -विँशो॑ देववि॒श -ङ्खलु॒ वै
कल्प॑मान -म्मनुष्यवि॒शमनु॑ कल्पते॒ य -
न्मा॑रु॒तीमृच॑म॒न्वाह॑ वि॒शा -ङ्कॢप्त्यै᳚
ब्रह्मवा॒दिनो॑ वदन्ति प्रया॒जव॑दननूया॒ज -
म्प्रा॑य॒णीय॑ -ङ्का॒र्य॑ -मनूया॒जव॑ - [-
मनूया॒जव॑त् , अ॒प्र॒या॒ज -मु॑दय॒नीय॒] 36

-दप्रया॒ज -मु॑दय॒नीय॒ -मिती॒मे वै प्र॑या॒जा अ॒मी
अ॑नूया॒जा -स्सैव सा य॒ज्ञस्य॒ सन्त॑ति॒स्त -
त्तथा॒ न का॒र्य॑मा॒त्मा वै प्र॑या॒जाः प्र॒जा -
ऽनू॑या॒जा य -त्प्र॑या॒जा -
न॑न्तरि॒यादा॒त्मान॑म॒ -न्तरि॑या॒ -द्यद॑नूया॒जा
-न॑न्तरि॒या -त्प्र॒जाम॒न्तरि॑या॒द्यतः॒ खलु॒ वै
य॒ज्ञस्य॒ वित॑तस्य॒ न क्रि॒यते॒ तदनु॑ य॒ज्ञः
परा॑ भवति य॒ज्ञ -म्प॑रा॒भव॑न्तं॒ -यँज॑मा॒नो -ऽनु॒
[-यँज॑मा॒नो -ऽनु॑, परा॑ भवति] 37

परा॑ भवति प्रया॒जव॑दे॒वा -नू॑या॒जव॑ -
त्प्राय॒णीय॑ -ङ्का॒र्य॑ -म्प्रया॒जव॑दनूया॒जव॑ -
दुदय॒नीय॒ -न्ना -ऽऽत्मान॑मन्त॒रेति॒ न प्र॒जा -न्न
य॒ज्ञः प॑रा॒भव॑ति॒ न यज॑मानः प्राय॒णीय॑स्य
निष्का॒स उ॑दय॒नीय॑म॒भि निर्व॑पति॒ सैव सा
य॒ज्ञस्य॒ सन्त॑ति॒र्याः प्रा॑य॒णीय॑स्य
या॒ज्या॑ य -त्ता उ॑दय॒नीय॑स्य या॒ज्याः᳚ कु॒र्या
-त्परां॑अ॒मुं -लोँ॒कमा रो॑हे -त्प्र॒मायु॑क -
स्स्या॒द्याः प्रा॑य॒णीय॑स्य पुरो -
ऽनुवा॒क्या᳚स्ता उ॑दय॒नीय॑स्य या॒ज्याः᳚
करोत्य॒स्मिन्ने॒व लो॒के प्रति॑ तिष्ठति ॥ 38 ॥
(प्रज्ञा᳚त्यै – पश्यत्य – नूया॒जव॒ –
द्यज॑मा॒नो -ऽनु॑ – पुरोनुवा॒क्या᳚स्ता –
अ॒ष्टौ च॑) (अ. 5)

क॒द्रूश्च॒ वै सु॑प॒र्णी चा᳚ -
ऽऽत्मरू॒पयो॑रस्पर्धेता॒ग्ं॒ सा क॒द्रू -
स्सु॑प॒र्णीम॑जय॒ -थ्सा -ऽब्र॑वी -
त्तृ॒तीय॑स्यामि॒तो दि॒वि सोम॒स्तमा ह॑र॒ तेना॒ -
ऽऽत्मान॒ -न्निष्क्री॑णी॒ष्वेती॒यं -वैँ
क॒द्रूर॒सौ सु॑प॒र्णी छन्दाग्ं॑सि सौपर्णे॒या -
स्साब्र॑वीद॒स्मै वै पि॒तरौ॑ पु॒त्रा -न्बि॑भृत -
स्तृ॒तीय॑स्यामि॒तो दि॒वि सोम॒स्तमा ह॑र॒ तेना॒ -

ऽऽत्मान॒ -न्निष्क्री॑णी॒ष्वे - [निष्क्री॑णी॒ष्व ,
इति॑ मा] 39

-ति॑ मा क॒द्रूर॑वोच॒दिति॒ जग॒त्युद॑पत॒ -
च्चतु॑र्दशाक्षरा स॒ती सा ऽप्रा᳚प्य॒
न्य॑वर्तत॒ तस्यै॒ द्वे अ॒क्षरे॑ अमीयेता॒ग्ं॒
सा प॒शुभि॑श्च दी॒क्षया॒ चा -ऽग॑च्छ॒ -
त्तस्मा॒ज्जग॑ती॒ छन्द॑सा -म्पश॒व्य॑तमा॒
तस्मा᳚ -त्पशु॒मन्त॑ -न्दी॒क्षोप॑ नमति
त्रि॒ष्टुगुद॑पत॒ -त्त्रयो॑दशाक्षरा स॒ती सा
ऽप्रा᳚प्य॒ न्य॑वर्तत॒ तस्यै॒ द्वे अ॒क्षरे॑
अमीयेता॒ग्ं॒ सा दक्षि॑णाभिश्च॒ [दक्षि॑णाभिश्च ,
तप॑सा॒] 40

तप॑सा॒ चा -ऽग॑च्छ॒ -त्तस्मा᳚ -त्त्रि॒ष्टुभो॑
लो॒के माद्ध्य॑न्दिने॒ सव॑ने॒ दक्षि॑णा नीयन्त
ए॒त -त्खलु॒ वाव तप॒ इत्या॑हु॒र्य -स्स्व -
न्ददा॒तीति॑ गाय॒त्र्युद॑पत॒च्चतु॑रक्षरा
स॒त्य॑जया॒ ज्योति॑षा॒ तम॑स्या अ॒जा -
ऽभ्य॑रुन्ध॒ तद॒जाया॑ अज॒त्वग्ं सा सोम॒ -ञ्चा -
ऽऽह॑रच्च॒त्वारि॑ चा॒क्षरा॑णि॒ सा -
ऽष्टाक्ष॑रा॒ सम॑पद्यत ब्रह्मवा॒दिनो॑ वदन्ति॒ [
ब्रह्मवा॒दिनो॑ वदन्ति , कस्मा᳚ -थ्स॒त्या -] 41

कस्मा᳚ -थ्स॒त्या -द्गा॑य॒त्री कनि॑ष्ठा॒
छन्द॑साग्ं स॒ती य॑ज्ञमु॒ख -म्परी॑या॒येति॒
यदे॒वाद -स्सोम॒मा -ऽह॑र॒ -त्तस्मा᳚ -द्यज्ञमु॒ख -
म्पर्यै॒ -त्तस्मा᳚ -त्तेज॒स्विनी॑तमा प॒द्भ्या -
न्द्वे सव॑ने स॒मगृ॑ह्णा॒ -न्मुखे॒नैकं॒ -
यँन्मुखे॑न स॒मगृ॑ह्णा॒ -त्तद॑धय॒ -त्तस्मा॒ -
द्द्वे सव॑ने शु॒क्र॑वती प्रातस्सव॒न -ञ्च॒
माद्ध्य॑न्दिन -ञ्च॒ तस्मा᳚ -त्तृतीय सव॒न
ऋ॑जी॒षम॒भि षु॑ण्वन्ति धी॒तमि॑व॒ हि मन्य॑न्त [
हि मन्य॑न्ते , आ॒शिर॒मव॑ नयति] 42

आ॒शिर॒मव॑ नयति सशुक्र॒त्वायाथो॒ स -
म्भ॑रत्ये॒वैन॒ -त्तग्ं सोम॑ -माह्रि॒यमा॑ण -
ङ्गन्ध॒र्वो वि॒श्वाव॑सः॒ पर्य॑मुष्णा॒ -थ्स
ति॒स्रो रात्रीः॒ परि॑मुषितो -ऽवस॒ -त्तस्मा᳚ -
त्ति॒स्रो रात्रीः᳚ क्री॒त -स्सोमो॑ वसति॒ ते
दे॒वा अ॑ब्रुव॒न् -थ्स्त्रीका॑मा॒ वै ग॑न्ध॒र्वा

स्स्त्रि॒या निष्क्री॑णा॒मेति॒ ते वाच॒ग्ग्॒
स्त्रिय॒मेक॑हायनी -ङ्कृ॒त्वा तया॒
निर॑क्रीण॒न् -थ्सा रो॒हि -द्रू॒प -ङ्कृ॒त्वा
ग॑न्ध॒र्वेभ्यो॑ - [ग॑न्ध॒र्वेभ्यः॑ ,
अ॒प॒क्रम्या॑तिष्ठ॒ -त्त -द्रो॒हितो॒] 43

-ऽप॒क्रम्या॑तिष्ठ॒ -त्त -द्रो॒हितो॒ जन्म॒ ते
दे॒वा अ॑ब्रुव॒न्नप॑ यु॒ष्मदक्र॑मी॒ -
न्नास्मानु॒ -पाव॑र्तते॒ वि ह्व॑यामहा॒ इति॒
ब्रह्म॑ गन्ध॒र्वा अव॑द॒न्नगा॑य -न्दे॒वा -स्सा
दे॒वा -न्गाय॑त उ॒पाव॑र्तत॒ तस्मा॒ -
द्गाय॑न्त॒ग्ग्॒ स्त्रियः॑ कामयन्ते॒ कामु॑का
एन॒ग्ग्॒ स्त्रियो॑ भवन्ति॒ य ए॒वं -वेँदाथो॒ य
ए॒वं -विँ॒द्वानपि॒ जन्ये॑षु॒ भव॑ति॒ तेभ्य॑ ए॒व
द॑दत्यु॒त य -द्ब॒हुत॑या॒ [य -द्ब॒हुत॑याः ,
भव॒न्त्येक॑हायन्या] 44

भव॒न्त्येक॑हायन्या क्रीणाति वा॒चैवैन॒ग्ं॒
सर्व॑या क्रीणाति॒ तस्मा॒देक॑हायना मनु॒ष्या॑
वाचं॑ -वँद॒न्त्यकू॑ट॒या ऽक॑र्ण॒या -ऽ
का॑ण॒याश्लो॑ण॒या ऽस॑प्तशफया क्रीणाति॒
सर्व॑यै॒वैन॑ -ङ्क्रीणाति॒ यच्छ्वे॒तया᳚
क्रीणी॒या -द्दु॒श्चर्मा॒ यज॑मान -स्स्या॒द्य -
त्कृ॒ष्णया॑ -ऽनु॒स्तर॑णी स्या -त्प्र॒मायु॑को॒
यज॑मान -स्स्या॒द्य -द्द्वि॑रू॒पया॒
वार्त्र॑घ्नी स्या॒ -थ्स वा॒ -ऽन्य -ञ्जि॑नी॒या -
त्तं -वाँ॒ -ऽन्यो जि॑नीयादरु॒णया॑ पिङ्गा॒क्ष्या
क्री॑णात्ये॒तद्वै सोम॑स्य रू॒पग्ग्
स्वयै॒वैन॑ -न्दे॒वत॑या क्रीणाति ॥ 45 ॥
(निष्क्री॑णीष्व॒ – दक्षि॑णाभिश्च – वदन्ति॒ –
मन्य॑न्ते -गन्ध॒र्वेभ्यो॑ -ब॒हुत॑याः -
पिङ्गा॒क्ष्या -दश॑ च) (अ. 6)

तद्धिर॑ण्यमभव॒ -त्तस्मा॑द॒द्भ्यो हिर॑ण्य -
म्पुनन्ति ब्रह्मवा॒दिनो॑ वदन्ति॒ कस्मा᳚ -
थ्स॒त्याद॑न॒स्थिके॑न प्र॒जाः प्र॒वीय॑न्ते
ऽस्थ॒न्वती᳚र्जायन्त॒ इति॒ यद्धिर॑ण्य -
ङ्घृ॒ते॑ -ऽव॒धाय॑ जु॒होति॒ तस्मा॑दन॒स्थिके॑न
प्र॒जाः प्र वी॑यन्ते ऽस्थ॒न्वती᳚र्जायन्त
ए॒तद्वा अ॒ग्नेः प्रि॒य -न्धाम॒ य -द्घृ॒त -न्तेजो॒
हिर॑ण्यमि॒यन्ते॑ शुक्र त॒नूरि॒दं -वँर्च॒

इत्या॑ह॒ सते॑जसमे॒वैन॒ग्ं॒ सत॑नु - [सत॑नुम् ,
कु॒रो॒त्यथो॒] 46

-ङ्क॒रो॒त्यथो॒ स -म्भ॑रत्ये॒वैन॒ं -यँदब॑द्ध्म -
वद॒द्ध्या -द्द॒र्भाः ॓ प्र॒जाना ॓ -म्परा॒पातु॑का -
स्स्युर्ब॒द्ध्मवं॑ दधाति॒ गर्भि॑णा॒ -न्धृत्यै॑
निष्ट॒र्क्य॑ -म्बद्ध्नाति प्र॒जाना ॓ -
म्प्र॒जन॑नाय॒ वाग्वा ए॒षा य -थ्सो॑म॒क्रय॑णी॒
जू॒रसीत्या॑ह॒ यद्धि मन॑सा॒ जव॑ते॒ त -द्वा॒चा
वद॑ति धृ॒ता मन॒सेत्या॑ह॒ मन॑सा॒ हि वाग्धृ॒ता
जुष्टा॒ विष्णं॑व॒ इत्या॑ह [ ] 47

य॒ज्ञो वै विष्णु॑ र्य॒ज्ञाये॒वैना॒ -ञ्जुष्टा ॓ -
ङ्करोति॒ तस्या ॓स्ते स॒त्यसं॑वसः प्रस॒व इत्या॑ह
सवि॒तृ -प्रसू॑ताम॒ेव वाच॒मवं॑ रुन्धे॒
काण्डे॑काण्डे॒ वै क्रि॒यमा॑णे य॒ज्ञग्ं॒
रक्षाग्ं॑सि जिघाग्ं॑सन्त्ये॒ष खलु॒ वा
अर॑क्षोहत॒ः पन्था॒ यो॓ -ऽग्नेश्च॒ सूर्य॑स्य च॒
सूर्य॑स्य॒ चक्षु॒रा -ऽरु॑हम॒ग्नेर॒क्ष्णः
क॒नीनि॑का॒मित्या॑ह॒ य ए॒वार॑क्षोहत॒ः
पन्था॒स्तग्ं॒ स॒मारो॑हति॒ [स॒मारो॑हति , वाग्वा
ए॒षा] 48

वाग्वा ए॒षा य -थ्सो॑म॒क्रय॑णी॒ चिद॑सि म॒ना -
ऽसीत्या॑ह॒ शास्त्ये॒वैना॑मे॒त -
त्तस्मा ॓च्छि॒ष्टाः प्र॒जा जा॑यन्ते॒
चिद॒सीत्या॑ह॒ यद्धि मन॑सा चे॒तय॑ते॒ त -द्वा॒चा
वद॑ति म॒ना -ऽसीत्या॑ह॒ यद्धि मन॑सा -ऽभि॒गच्छ॑ति॒
त -त्क॒रोति॒ धीर॒सीत्या॑ह॒ यद्धि मन॑सा॒
ध्याय॑ति॒ त -द्वा॒चा [ ] 49

वद॑ति॒ दक्षि॑णा॒ -ऽसीत्या॑ह॒ दक्षि॑णा॒ ह्ये॑षा
य॒ज्ञिया॒ -ऽसीत्या॑ह य॒ज्ञिया॑मे॒वैना ॓ -
ङ्करोति क्ष॒त्रिया॒सीत्या॑ह क्ष॒त्रिया॒
ह्ये॑षा ऽदि॑तिरस्युभ॒यत॑श्शी॒र् ष्णीत्या॑ह॒
यदे॒वा -ऽऽदि॒त्यः प्रा॑य॒णीयो॑
य॒ज्ञाना॑मादि॒त्य उ॑दय॒नीय॒ -
स्तस्मा॑दे॒वमा॑ह॒ यदब॑द्धा॒ स्यादय॑ता
स्या॒द्य -त्प॑दिब॒द्धा -ऽनु॒स्तर॑णी स्या -
त्प्र॒मायु॑को॒ यज॑मान -स्स्या॒ - [यज॑मान -
स्स्यात् , य -त्क॑र्णगृही॒ता] 50

-द्य -त्क॑र्णगृही॒ता वार्त्र॑घ्नी स्या॒ -थ्स वा॒ -
ऽन्य -ञ्जि॑नी॒या -त्तं -वाँ॒ -ऽन्यो
जि॑नीयान्मि॒त्रस्त्वा॑ प॒दि
ब॑द्ध्ना॒त्वित्या॑ह मि॒त्रो वै शि॒वो दे॒वाना॒ -
न्तेनै॒वैना᳚ -म्प॒दि ब॑द्ध्नाति पू॒षा -
ऽद्ध्व॑नः पा॒त्वित्या॑हे॒यं -वैँ
पू॒षेमामे॒वास्या॑ अधि॒पाम॑क॒ -स्सम॑ष्ट्या॒
इन्द्रा॒या -
द्ध्य॑क्षा॒येत्या॒हेन्द्र॑मे॒वास्या॒
अद्ध्य॑क्ष -ङ्करो॒ - [अद्ध्य॑क्ष -ङ्करोति , अनु॑
त्वा मा॒ता] 51

-त्यनु॑ त्वा मा॒ता म॑न्यता॒मनु॑ पि॒तेत्या॒हा -
नु॑मतयै॒वैन॑या क्रीणाति॒ सा दे॑वि
दे॒वमच्छे॒हीत्या॑ह दे॒वी ह्ये॑षा दे॒व -स्सोम॒
इन्द्रा॑य॒ सोम॒मित्या॒हेन्द्रा॑य॒ हि सोम॑
आह्रि॒यते॒ यदे॒त -द्यजु॒र्न ब्रू॒या -
त्परा᳚च्ये॒व सो॑म॒क्रय॑णीया -द्रु॒द्रस्त्वा -
ऽऽ व॑र्तय॒त्वित्या॑ह रु॒द्रो वै क्रू॒रो [
रु॒द्रो वै क्रू॒रः , दे॒वाना॒ -न्तमे॒वास्यै॑] 52

दे॒वाना॒ -न्तमे॒वास्यै॑ प॒रस्ता᳚ -
द्दधा॒त्यावृ॑त्त्यै क्रू॒रमि॑व॒ वा ए॒त -
त्क॑रोति॒ य -द्रु॒द्रस्य॑ की॒र्तय॑ति
मि॒त्रस्य॑ प॒थेत्या॑ह॒ शान्त्यै॑ वा॒चा वा ए॒ष
वि क्री॑णीते॒ य -स्सो॑म॒क्रय॑ण्या स्व॒स्ति
सोम॑सखा॒ पुन॒रेहि॑ स॒ह र॒य्येत्या॑ह वा॒चैव
वि॒क्रीय॒ पुन॑रा॒त्मन् वाच॑ -न्ध॒त्ते -
ऽनु॑पदासुका -ऽस्य॒ वाग्भ॑वति॒ य ए॒वं -वेँद॑ ॥ 53 ॥
(सत॑नुं॒ – विँष्ण॑व॒ इत्या॑ह – स॒मारो॑हति॒ –
ध्याय॑ति॒ त -द्वा॒चा – यज॑मान -स्स्यात् – करोति
– क्रू॒रो – वेद॑) (अ. 7)

षट् प॒दान्यनु॒ नि क्रा॑मति षड॒हं -वाँन्नाति॑
वदत्यु॒त सं॑ वँथ्स॒रस्याय॑ने॒ याव॑त्ये॒व
वाक्तामव॑ रुन्धे सप्त॒मे प॒दे जु॑होति
स॒प्तप॑दा॒ शक्व॑री प॒शव॒ -श्शक्व॑री
प॒शूने॒वाव॑ रुन्धे स॒प्त ग्रा॒म्याः प॒शवः॑
स॒प्ता -ऽऽर॒ण्या -स्स॒प्त छन्दाग्॑ -स्यु॒भय॒स्या -
व॑रुद्ध्यै॒ वस्व्य॑सि रु॒द्रा -ऽसीत्या॑ह
रू॒पमे॒वास्या॑ ए॒त -न्म॑हि॒मानं॒ - [ए॒त -

न्म॑हि॒मान᳚म् , व्याच॑ष्टे॒ बृह॒स्पति॑स्त्वा] 54

-व्याँच॑ष्टे॒ बृह॒स्पति॑स्त्वा सु॒म्ने
र॑ण्व॒त्वित्या॑ह॒ ब्रह्म॒ वै दे॒वाना॒ -
म्बृह॒स्पति॒ -र्ब्रह्म॑णै॒वास्मै॑ प॒शूनव॑
रुन्धे रु॒द्रो वसु॑भि॒रा चि॑के॒त्वित्या॒हा -
ऽऽवृ॑त्त्यै पृथि॒व्यास्त्वा॑ मू॒र्धन्ना
जि॑घर्मि देव॒यज॑न॒ इत्या॑ह पृथि॒व्या ह्ये॑ष
मू॒र्धा य -द्दे॑व॒यज॑न॒मिडा॑याः प॒द
इत्या॒हेडा॑यै॒ ह्ये॑त -त्प॒दं -यँ -
थ्सो॑म॒क्रय॑ण्यै घृ॒तव॑ति॒ स्वाहे - [स्वाहा᳚ ,
इत्या॑ह॒] 55

-त्या॑ह॒ यदे॒वास्यै॑ प॒दा -द्घृ॒तमपी᳚ड्यत॒
तस्मा॑दे॒वमा॑ह॒
यद॑द्ध्व॒र्युर॑न॒ग्नावाहु॑ति -
ञ्जुहु॒याद॒न्धो᳚ -ऽद्ध्व॒र्यु -स्स्या॒ -
द्रक्षाग्ं॑सि य॒ज्ञग्ं
ह॑न्यु॒र्॒हिर॑ण्यमु॒पास्य॑
जुहोत्यग्नि॒वत्ये॒व जु॑होति॒ नान्धो᳚ -
ऽद्ध्व॒र्यु र्भव॑ति॒ न य॒ज्ञग्ं रक्षाग्ं॑सि
घ्नन्ति॒ काण्डे॑काण्डे॒ वै क्रि॒यमा॑णे
य॒ज्ञग्ं रक्षाग्ं॑सि जिघाग्ंसन्ति॒
परि॑लिखित॒ग्ं॒ रक्षः॒ परि॑लिखिता॒ अरा॑तय॒
इत्या॑ह॒ रक्ष॑सा॒ -मप॑हत्या [रक्ष॑सा॒ -मप॑हत्यै ,
इ॒दम॒हग्ं] 56

इ॒दम॒हग्ं रक्ष॑सो ग्री॒वा अपि॑ कृन्तामि॒ यो᳚ -
ऽस्मा -न्द्वेष्टि॒ य -ञ्च॑ व॒य -न्द्वि॒ष्म
इत्या॑ह॒ द्वौ वाव पुरु॑षौ॒ य -ञ्चै॒व द्वेष्टि॒
यश्चै॑न॒ -न्द्वेष्टि॒ तयो॑ -रे॒वा -ऽन॑न्तराय -
ङ्ग्री॒वाः कृ॑न्तति प॒शवो॒ वै सो॑म॒क्रय॑ण्यै
प॒दं -याँ॑वत्त्मू॒तग्ं सं -वँ॑पति प॒शूने॒वाव॑
रुन्धे॒ -ऽस्मे राय॒ इति॒ सं वँ॑पत्या॒त्मान॑ -
मे॒वाद्ध्व॒र्युः -[-मे॒वाद्ध्व॒र्युः ,
प॒शुभ्यो॒] 57

प॒शुभ्यो॒ नान्तरे॑ति॒ त्वे राय॒ इति॒ यज॑मानाय॒
प्र य॑च्छति॒ यज॑मान ए॒व र॒यि -न्द॑धाति॒ तोते॒
राय॒ इति॒ पत्नि॑या अ॒र्धो वा ए॒ष आ॒त्मनो॒ य -
त्पत्नी॒ यथा॑ गृ॒हेषु॑ निध॒त्ते ता॒दृगे॒व त -

त्त्वष्टी॑मती ते सपे॒येत्या॑ह॒ त्वष्टा॒ वै
प॑शू॒ना -म्मि॑थु॒नानाग्ं॑ रूप॒कृ -द्रू॒पमे॒व
प॒शुषु॑ दधात्य॒स्मै वै लो॒काय॒ गार् ह॑पत्य॒ आ
धी॑यते॒ ऽमुष्मा॑ आहव॒नीयो॒ य -द्गार् ह॑पत्य
उप॒वपे॑द॒स्मि -ल्लोँ॒के प॑श॒मान् -थ्स्या॒ -
द्यदा॑हव॒नीये॒ ऽमुष्मि॑ -ल्लोँ॒के प॑शु॒मान् -
थ्स्या॑दु॒भयो॒रुप॑ वपत्यु॒भयो॑रे॒वैनं॑ -
लोँ॒कयोः᳚ पशु॒मन्त॑ -ङ्करोति ॥ 58 ॥
(म॒हि॒मान॒ग्ग्॒ – स्वाहा – ऽप॑हत्या –
अध्व॒र्यु – धी॑यते॒ – चतु॑र्विग्ंशतिश्च) (अ. 8)

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति वि॒चित्य॒ -स्सोमा (3) न
वि॒चित्या (3) इति॒ सोमो॒ वा ओष॑धीना॒ग्ं॒ राजा॒
तस्मि॒न्॒ . यदाप॑न्न -ङ्ग्रसि॒तमे॒वास्य॒ त -द्य -
द्वि॑चिनु॒या -द्यथा॒ ऽऽस्या᳚द्ग्रसि॒त -
न्नि॑ष्खि॒दति॑ ता॒दृगे॒व तद्यन्न वि॑चिनु॒या -
द्यथा॒ ऽक्षन्नाप॑न्नं -विँ॒धाव॑ति ता॒दृगे॒व त -
त्क्षोधु॑को ऽद्ध्व॒र्यु -स्स्या -त्क्षोधु॑को॒
यज॑मान॒ -स्सोम॑विक्रयि॒न् -थ्सोमग्ं॑
शोध॒येत्ये॒व ब्रू॑या॒ -द्यदीत॑रं॒ - [ब्रू॑या॒ -
द्यदीत॑रम् , यदीत॑र -] 59

-यँदीत॑र -मु॒भये॑नै॒व सो॑मविक्र॒यिण॑ -मर्पयति॒
तस्मा᳚ -थ्सोमविक्र॒यी क्षोधु॑को ऽरु॒णो ह॑ स्मा॒
-ऽऽहौप॑वेशि -स्सोम॒क्रय॑ण ए॒वाह -न्तृ॑तीय
सव॒नमव॑ रुन्ध॒ इति॑ पशू॒ना -ञ्चर्म॑ -न्मिमीते
प॒शूने॒वाव॑ रुन्धे प॒शवो॒ हि तृ॒तीय॒ग्ं॒
सव॑नं॒ -यँ -ङ्का॒मये॑ताप॒शु -स्स्या॒ -
दित्यृ॑क्ष॒त -स्तस्य॑ मिमीत॒र्क्षं -वाँ
अ॑पश॒व्य -म॑प॒शुरे॒व भ॑वति॒ य -ङ्का॒मये॑त
पशु॒मान् -थ्स्या॒ – [ ] 60

-दिति॑ लोम॒तस्तस्य॑ मिमीतै॒तद्वै प॑शू॒नाग्ं
रू॒पग्ं रू॒पेणै॒वा -ऽस्मै॑ प॒शूनव॑ रुन्धे
पशु॒माने॒व भ॑वत्य॒पामन्ते᳚ क्रीणाति॒
सर॑समे॒वैन॑ -ङ्क्रीणात्य॒ -मात्यो॒ -ऽसीत्या॑हा॒ -
ऽमैवैन॑ -ङ्कुरुते शु॒क्रस्ते॒ ग्रह॒ इत्या॑ह
शु॒क्रो ह्य॑स्य॒ ग्रहो ऽन॒सा -ऽच्छ॑ याति
महि॒मान॑ -मे॒वास्याच्छ॑ या॒त्यन॒सा - [या॒त्यन॒सा
, अच्छ॑] 61

-ऽच्छ॑ याति॒ तस्मा॑ -दनोवा॒ह्यग्ं॑ स॒मे जीव॑नं॒ -
यँत्र॒ खलु॒ वा ए॒तग्ं शी॒र् ष्णा हर॑न्ति॒
तस्मा᳚च्छीर् षहा॒र्य॑ -ङ्गि॒रौ जीव॑नम॒भि त्य -
न्दे॒वग्ं स॑वि॒तार॒मित्यति॑ -च्छन्दस॒र्चा
मि॑मी॒ते ऽति॑च्छन्दा॒ वै सर्वा॑णि॒
छन्दाग्ं॑सि॒ सर्वे॑भिरे॒वैन॒ -
ञ्छन्दो॑भिर्मिमीते॒ वर् ष्म॒ वा ए॒षा छन्द॑सां॒ -
यँदति॑च्छन्दा॒ यदति॑च्छन्दस॒र्चा मिमी॑ते॒
वर् ष्मै॒वैनग्ं॑ समा॒नाना᳚ -ङ्करो॒त्येक॑यैकयो॒
-थ्सर्ग॑ - [-ङ्करो॒त्येक॑यैकयो॒ -थ्सर्ग᳚म् ,
मि॒मी॒ते] 62

-म्मिमी॒ते ऽया॑तयाम्नियायातयाम्नियै॒वैन॑ -
म्मिमीते॒ तस्मा॒न्नाना॑वीर्या अ॒ङ्गुल॑य॒ -
स्सर्वा᳚स्वङ्गु॒ष्ठमुप॒ नि गृ॑ह्णाति॒ तस्मा᳚ -
थ्स॒माव॑द्वीर्यो॒ -ऽन्याभि॑ -
र॒ङ्गुलि॑भि॒स्तस्मा॒ -थ्सर्वा॒ अनु॒ स -ञ्च॑रति॒
य -थ्स॒ह सर्वा॑भि॒र्मिमी॑त॒ सग्ग् श्लि॑ष्टा
अ॒ङ्गुल॑यो जायेर॒ -न्नेक॑यैकयो॒ -थ्सर्ग॑ -
म्मिमीते॒ तस्मा॒ -द्विभ॑क्ता जायन्ते॒ पञ्च॒
कृत्वो॒ यजु॑षा मिमीते॒ पञ्चा᳚क्षरा प॒ङ्क्तिः
पाङ्क्तो॑ य॒ज्ञो य॒ज्ञमे॒वाव॑ रुन्धे॒ पञ्च॒
कृत्व॑ -स्तू॒ष्णी - [कृत्व॑ -स्तू॒ष्णीम् , दश॒ स -
म्प॑द्यन्ते॒] 63

-न्दश॒ स -म्प॑द्यन्ते॒ दशा᳚क्षरा वि॒राडन्नं॑ -
विँ॒रा -ड्वि॒राजै॒वान्नाद्य॒मव॑ रुन्धे॒ य -
द्यजु॑षा॒ मिमी॑ते भू॒तमे॒वाव॑ रुन्धे॒ य -
त्तू॒ष्णी -म्भ॑वि॒ष्य -द्य -द्वै तावा॑ने॒व सोम॒ -
स्स्या -द्याव॑न्त॒ -म्मिमी॑ते॒ यज॑मानस्यै॒व
स्या॒न्नापि॑ सद॒स्या॑ना -
म्प्र॒जाभ्य॒स्त्वेत्युप॒ समू॑हति
सद॒स्या॑ने॒वान्वा भ॑जति॒ वास॒सोप॑ नह्यति
सर्वदेव॒त्यं॑ -वैँ [ ] 64

वास॒ -स्सर्वा॑भिरे॒वैन॑ -न्दे॒वता॑भि॒ -
स्सम॑र्धयति प॒शवो॒ वै सोमः॑ प्रा॒णाय॒
त्वेत्युप॑ नह्यति प्रा॒णमे॒व प॒शुषु॑ दधाति
व्या॒नाय॒ त्वेत्यनु॑ शृन्थति व्या॒नमे॒व
प॒शुषु॑ दधाति॒ तस्मा᳚ -थ्स्व॒पन्त॑ -म्प्रा॒णा न
ज॑हति ॥ 65 ॥

(इत॑रं **-** पशु॒मान् **-**थ्स्या ᳚ **-**द्या॒त्यन॑सो॒ **-**
थ्सर्गं॑ **-** तू॒ष्णीग्ं॒ **-** स॑र्वदे॒वत्यं॑ **-**वैँ **-**
त्र॒य॑स्त्रिग्ं॑शच्च **) (**अ **. 9)**

य -त्क॒लया॑ ते श॒फेन॑ ते क्रीणा॒नीति॒
पणे॒तागो॑अर्घ॒ग्ं॒ सोम॑ -ङ्कु॒र्यादगो॑अ॒र्घं॒ -
यँज॑मान॒ -मगो॑अर्घमद्ध्व॒र्यु -ङ्गोस्तु
म॑हि॒मान॒ -न्नाव॑ तिरे॒ -द्गवा॑ ते
क्रीणा॒नीत्ये॒व ब्रू॑या -द्गोअ॒र्घमे॒व सोम॑ -
ङ्करोति॑ गोअ॒र्घं -यँज॑मान -
ङ्गोअ॒र्घम॑द्ध्व॒र्यु -न्न गोर्म॑हि॒मान॒मव॑
तिरत्य॒जया ᳚ क्रीणाति॒ सत॑पसमे॒वैन॑ -
ङ्क्रीणाति॒ हिर॑ण्येन क्रीणाति॒ सशुं॑क्रमे॒वै -
[सशुं॑क्रमे॒व , ए॒न -ङ्क्री॒णा॒ति॒ धे॒न्वा
क्री॑णाति॒] 66

-न॑ -ङ्क्रीणाति धे॒न्वा क्री॑णाति॒
साशि॑रमे॒वैन॑ -ङ्क्रीणात्यृष॒भेण॑ क्रीणाति॒
सेन्द्र॑मे॒वैन॑ -ङ्क्रीणात्यन॒डुहा ᳚ क्रीणाति॒
वह्नि॒र्वा अ॑न॒ड्वान् . वह्नि॑ने॒व वह्नि॑
य॒ज्ञस्य॑ क्रीणाति मिथु॒नाभ्या ᳚ -ङ्क्रीणाति
मिथु॒नस्याव॑ -रुद्ध्यै॒ वास॑सा क्रीणाति
सर्वदे॒वत्यं॑ -वैँ वा॒स -स्सर्वा ᳚भ्य ए॒वैन॑ -
न्दे॒वता ᳚भ्यः क्रीणाति॒ दश॒ स -म्पं॑द्यन्ते॒
दशा᳚क्षरा वि॒राडन्न॑ -वि॒ँरा -
ड्वि॒राजै॒वान्नाद्य॒मव॑ रुन्धे॒ [रुन्धे , तप॑स -
स्त॒नूर॑सि] 67

तप॑स -स्त॒नूर॑सि प्र॒जाप॑ते॒ -र्वर्ण॒ इत्या॑ह
प॒शुभ्य॑ ए॒व तद॑द्ध्व॒ -र्युर्नि ह्नु॑त आ॒त्मनो
-ऽना᳚व्रस्काय॒ गच्छ॑ति॒ श्रिय॒ -म्प्र
प॒शूना ᳚प्नोति॒ य ए॒वं -वेँद॑ शु॒क्र -न्ते॑
शु॒क्रेण॑ क्रीणा॒मीत्या॑ह यथा य॒जुरे॒वैत -
द्दे॒वा वै येन॒ हिर॑ण्येन॒ सोम॒मक्री॑ण॒ -
न्तद॑भी॒षहा॒ पुन॒रा -ऽद॑दत॒ को हि तेज॑सा
विक्रे॒ष्यत॒ इति॒ येन॒ हिर॑ण्येन॒ [हिर॑ण्येन ,
सोम॑ -] 68

सोम॑ -ङ्क्रीणी॒या -त्तद॑भी॒षहा॒ पुन॒रा द॑दीत॒
तेज॑ ए॒वा -ऽऽत्म -न्धंत्ते॒ -ऽस्मे ज्योति॑ः
सोमविक्र॒यिणि॒ तम॒ इत्या॑हु॒ ज्योति॑रे॒व

यज॑माने दधाति॒ तम॑सा सोमविक्र॒यिण॑मर्पयति॒
यदनु॑पग्रथ्य ह॒न्या -द्द॑न्द॒शूका॒स्ताग्ं
समाग्ं॑ स॒र्पा -स्स्यु॑रि॒दम॒हग्ं स॒र्पाणा᳚ -
न्दन्द॒शूका॑ना -ङ्ग्री॒वा उप॑
ग्रथ्ना॒मीत्या॒हा -द॑न्दशूका॒स्ताग्ं समाग्ं॑
स॒र्पा भ॑वन्ति॒ तम॑सा सोमविक्र॒यिणं॑ -
विँद्ध्यति॒ स्वान॒ [स्वान॑ , भ्राजेत्या॑है॒ते] 69

भ्राजेत्या॑है॒ते वा अ॒मुष्मि॑ -ल्लोँ॒के
सोम॑मरक्ष॒ -न्तेभ्यो -ऽधि॒ सोम॒मा -ऽह॑र॒न्॒ .
यदे॒तेभ्यः॑ सोम॒क्रय॑णा॒ -
न्नानु॑दि॒शेदक्री॑तो -ऽस्य॒ सोमः॑
स्या॒न्नास्यै॒ते॑ ऽमुष्मि॑ -ल्लोँ॒के सोमग्ं॑
रक्षेयु॒र्यदे॒तेभ्यः॑ सोम॒क्रय॑णाननुदि॒शति॑
क्री॒तो᳚ -ऽस्य॒ सोमो॑ भवत्ये॒ते᳚ -ऽस्या॒मुष्मि॑ -
ल्लोँ॒के सोमग्ं॑ रक्षन्ति ॥ 70 ॥
(सशु॑क्रमे॒व – रु॑न्ध॒ – इति॒ येन॒ हिर॑ण्येन॒
– स्वान॒ – चतु॑श्चत्वारिग्ंशच्च) (अ. 10)

वा॒रु॒णो वै क्री॒त -स्सोम॒ उप॑नद्धो मि॒त्रो न॒
एहि॒ सुमि॑त्रधा॒ इत्या॑ह॒ शान्त्या॒
इन्द्र॑स्यो॒रुमा वि॑श॒ दक्षि॑ण॒मित्या॑ह
दे॒वा वै यग्ं सोम॒मक्री॑ण -न्तमिन्द्र॑स्यो॒रौ
दक्षि॑ण॒ आ ऽसा॑दयन्ने॒ष खलु॒ वा ए॒तर् हीन्द्रो॒
यो यज॑ते॒ तस्मा॑दे॒वमा॒होदायु॑षा
स्वा॒युषेत्या॑ह दे॒वता॑ ए॒वा -न्वा॒रभ्यो - [ए॒वा -
न्वा॒रभ्योत् , ति॒ष्ठ॒त्यु॒ -र्व॑न्तरि॑क्ष॒ -] 71

-त्ति॑ष्ठत्यु॒ -र्व॑न्तरि॑क्ष॒ -
मन्वि॒हीत्या॑हा -न्तरिक्षदेव॒त्यो᳚ (1॒)
ह्ये॑तर् हि॒ सोमो -ऽदि॑त्या॒ -स्सदो॒ -
ऽस्यदि॑त्या॒ -स्सद॒ आ सी॒देत्या॑ह
यथाय॒जुरे॒वैत -द्वि वा ए॑नमे॒तद॑र्धयति॒ य -
द्वा॑रु॒णग्ं सन्त॑ -म्मै॒त्र -ङ्क॒रोति॑
वारु॒ण्यर्चा -ऽऽ सा॑दयति॒ स्वयै॒वैन॑ -
न्दे॒वत॑या॒ सम॑र्धयति॒ वास॑सा प॒र्यान॑ह्यति
सर्वदेव॒त्यं॑ -वैँ वास॒ -स्सर्वा॑भिरे॒वै - [वास॒ -
स्सर्वा॑भिरे॒व , ए॒न॒ -न्दे॒वता॑भि॒ -] 72

-न॑ -न्दे॒वता॑भि॒ -स्सम॑र्धय॒त्यथो॒
रक्ष॑सा॒मप॑हत्यै॒ वने॑षु॒ व्य॑न्तरि॑क्ष -

न्तता॒नेत्या॑ह॒ वने॑षु॒ हि व्य॑न्तरि॑क्ष -
न्त॒तान॒ वाज॒मर्व॒थ्स्वित्या॑ह॒ वाज॒ग्ग्॒
ह्यर्व॑थ्सु॒ पयो॑ अघ्नि॒यास्वित्या॑ह॒ पयो॒
ह्य॑घ्नि॒यासु॑ हृ॒थ्सु क्रतु॒मित्या॑ह
हृ॒थ्सु हि क्रतुं॒ -वँरु॑णो
वि॒क्ष्व॑ग्निमित्या॑ह॒ वरु॑णो॒ हि
वि॒क्ष्व॑ग्नि -न्दि॒वि सूर्य॒ - [सूर्य᳚म् ,
इत्या॑ह दि॒वि हि] 73

-मित्या॑ह दि॒वि हि सूर्य॒ग्ं॒
सोम॒मद्रा॒वित्या॑ह॒ ग्रावा॑णो॒ वा
अद्र॑य॒स्तेषु॒ वा ए॒ष सोम॑ -न्दधाति॒ यो यज॑ते॒
तस्मा॑दे॒वमा॒होदु॒ त्य -ञ्जा॒तवे॑दस॒मिति॑
सौ॒र्यर्चा कृ॑ष्णाजि॒न -म्प्र॒त्यान॑ह्यति॒
रक्ष॑सा॒मप॑हत्या॒ उस्रा॒वेत॑ -न्धूर्
षाहा॒वित्या॑ह यथाय॒जुरे॒वैत -त्प्र च्य॑वस्व
भुवस्पत॒ इत्या॑ह भू॒ताना॒ग्॒ ह्ये॑ [
भू॒ताना॒ग्ं॒ हि, ए॒ष पति॒ -र्विश्वा᳚न्य॒भि] 74

-ष पति॒ -र्विश्वा᳚न्य॒भि धामा॒नीत्या॑ह॒
विश्वा॑नि॒ ह्ये᳚ (1॒) षो॑ -ऽभि धामा॑नि
प्र॒च्यव॑ते॒ मा त्वा॑ परिप॒री वि॑द॒दित्या॑ह॒
यदे॒वाद -स्सोम॑माह्रि॒यमा॑ण -ङ्गन्ध॒र्वो
वि॒श्वाव॑सुः प॒र्यमु॑ष्णा॒ -त्तस्मा॑ -
दे॒वमा॒हाप॑रिमोषाय॒ यज॑मानस्य
स्व॒स्त्यय॑न्य॒सीत्या॑ह॒ यज॑मानस्यै॒वैष
य॒ज्ञस्या᳚न्वार॒भों ऽन॑वच्छित्त्यै॒ वरु॑णो॒
वा ए॒ष यज॑मानम॒भ्यैति॒ य - [यत्, क्री॒त -स्सोम॒
उप॑नद्धो॒ नमो॑] 75

-त्क्री॒त -स्सोम॒ उप॑नद्धो॒ नमो॑ मि॒त्रस्य॒
वरु॑णस्य॒ चक्ष॑स॒ इत्या॑ह॒ शान्त्या॒ आ सोमं॒ -
वँह॑न्त्य॒ग्निना॒ प्रति॑ तिष्ठते॒ तौ स॒भं
वँ॑न्तौ॒ यज॑मानम॒भि स -म्भ॑वतः पु॒रा खलु॒ वावैष
मेधा॑या॒ -ऽऽत्मान॑मा॒रभ्य॑ चरति॒ यो दी᳚क्षि॒तो
यद॑ग्नीषो॒मीय॑ -म्प॒शुमा॒लभ॑त आत्मनि॒ष्क्रय॑ण
ए॒वास्य॒ स तस्मा॒ -त्तस्य॒ ना -ऽऽश्य॑ -
म्पुरुषनि॒ष्क्रय॑ण इव॒ ह्यथो॒ खल्वा॑हु
र॒ग्नीषोमा᳚भ्यां॒ -वाँ इन्द्रो॑
वृ॒त्रम॑ह॒न्निति॒ यद॑ग्नीषो॒मीय॑ -
म्प॒शुमा॒लभ॑त॒ वार्त्र॑घ्न ए॒वास्य॒ स तस्मा᳚ -

द्वा॒श्यं॑ -वाँरु॒ण्यर्चा परि॑ चरति॒
स्वयै॒वैन॑ -न्दे॒वत॑या॒ परि॑ चरति ॥ 76 ॥
(अ॒न्वा॒रभ्योथ् – सर्वा॑भिरे॒व – सूर्यं॑ –
भू॒ताना॒ग्॒ ह्ये॑ – ति॒ य – दा॑हुः –
स॒प्तविग्ं॑शतिश्च) (अ. 11)

(प्रा॒चीन॑वग्ंशं॒ -याँव॑न्त – ऋख्सा॒मे – वाग्वै
दे॒वेभ्यो॑ – दे॒वा वै दे॑व॒यज॑नं – क॒द्रूश्च॒ –
तद्धिर॑ण्य॒ग्ं॒ – षट् प॒दानि॑ – ब्रह्मवा॒दिनो॑
वि॒चित्यो॒ – य -त्क॒लया॑ ते – वारु॒णो वै क्री॒त -
स्सोम॒ – एका॑दश)

(प्रा॒चीन॑वग्ंश॒ग्ग्॒ – स्वाहेत्या॑ह॒ – ये᳚ -
ऽन्त -श्श॒रा – ह्ये॑ष सं – तप॑सा च॒ – यत्क॑र्णगृही॒
– तेति॑ लोम॒तो – वा॑रु॒णः – षट् -थ्स॑प्ततिः)

(प्रा॒चीन॑वग्ं श॒, म्परि॑ चरति)

॥ हरिः॑ ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां
षष्ठकाण्डे प्रथमः प्रश्न -स्समाप्तः ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh. Phone Number: +91 9493475515 | www.amritanilayam.org